# kirAtamUrti stotraM

# किरातमूर्तिस्तोत्रम्

## Document Information

Text title : kirAtamUrtistotram

File name : kirAtamUrtistotram.itx

Category : aShTaka, shiva, vAsudevanElayath

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : July 10, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

kirAtamUrti stotraM

# किरातमूर्तिस्तोत्रम्

नमः शिवाय भर्गाय लीलाशबररूपिणे ।
प्रपन्नार्तपरित्राणकरुणामसृणात्मने ॥ १॥

पिञ्छोत्तंसं समानीलश्मश्रुविद्योतिताननम् ।
उदग्रारक्तनयनं गौरकौशेयवाससम् ॥ २॥

कैलासशिखरोत्तुङ्गं छुरिकाचापधारिणम् ।
किरातमूर्तिं ध्यायामि परमं कुलदैवतम् ॥ ३॥

दुर्जनैर्बहुधाऽऽक्रान्तं भयसम्भ्रान्तमानसम् ।
त्वदेकशरणं दीनं परिपालय नाथ, माम् ॥ ४॥

मह्यं द्रुह्यन्ति रिपवो बाह्याश्चाभ्यन्तराश्च ये ।
विद्रावय दयासिन्धो चापज्यानिस्वनेन तान् ॥ ५॥

कूटकर्मप्रसक्तानां शत्रूणां शातनाय भोः ।
चालय छुरिकां घोरां शतकोटिसमुज्ज्वलाम् ॥ ६॥

विपद्दावानलज्वालासन्तप्तं रोगपीडितम् ।
कर्तव्यताविमूढं मां त्रायस्व गिरिशात्मज ॥ ७॥

नमः किरातवपुषे नमः क्षेमङ्कराय च ।
नमः पापविघाताय नमस्ते धर्मसेतवे ॥ ८॥

नमो महैश्वर्यदाय नमो भक्तप्रियाय ते ।
नमो वीर्यनिधानाय नमो गौरीसुताय च ॥ ९॥

नमो नमस्ते विश्वात्मन् विश्वमङ्गलदायक ।
नमो नमस्ते सर्वेश सर्वशक्तिसमन्वित ॥ १०॥

रागद्वेषादिदुर्जन्तुसङ्कुले मन्मनोवने ।
विधत्स्व मृगयां नित्यं विशिष्टशबराकृते ॥ ११॥

यद्यत् करोमि भगवन् मनोवाक्कायकर्मभिः ।
भवत्प्रसादत्तत्सर्वं भूयात्त्वच्चरणार्चनम् ॥ १२॥

इति श्रीवासुदेवन् एलयथेन विरचितं किरातमूर्तिस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*kirAtamUrti stotraM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*